Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११९६ घ

Title नवग्रह संक्षेप होमविधिः

Author

Extent २६ पत्राणि Age

Subject धर्मशास्त्रम्

नवग्रहसंक्षेपहोमविधिः

११५६ ९६

ॐ श्रीगणेशाय नमः ॐ आवाहयाम्यहं देवं
ग्र. भानुं सर्वजगद्गुरुं ग्रहाणां सारथिर्यस्य सप्ता
१ श्वरथवाहनः श्रीपतिं यजमानस्य त्वष्टो भवज
गत्पते दिवाकरं महत्सादं ग्रहाधीश नमस्तु
ते रक्तवर्णं महातेजा रक्तवस्त्रा मभूषितं
बलिं पुष्पं च रक्तं चैव धूपोयं प्रतिगृह्यतां आ
हुस्ति विमंडलेन मंडले त्वं समाविश आवाह
याम्यहं देवं चंद्रं नक्षत्रनायकं शंभोः शिरस्थ
लंकारं प्रत्यक्षं लोकनायकं द्विसप्ततिमा

नाथंतारागणासमन्वितं ओषधीनांतुराजानं
सोममावाहयाम्यहं शुक्लवर्णोमहातेजाः
शुक्लस्रग्दामभूषितं बलिंपुष्पंचरुंचैव
धूपोयंप्रतिगृह्यतां इमस्मत्तिचमेत्रेणामंड
डलेत्वंसमाविश आवाहयाम्यहं देवंलोहि
तांगमहीसुतं लोहितोयस्तुवर्णोनदीप्ताग्नि
समप्रभः रक्तवर्णोमहातेजारक्तस्रग्दामभू
षितं बलिंपुष्पंचरुंचैवधूपोयंप्रतिगृह्यतां
अग्निर्मूर्धेतिमंत्रेणामंडलेत्वंसमाविशं आवा

हयाम्यहं देवं ध्रुपं वै तोहिणीसुतं सौंगोश्वरस्ता
हो॰ मान्हृं सदा बुद्धिविवर्द्धनं ध्रुपानां बुद्धिदाता
२ रं ध्रुपमावाहयाम्यहं पीतवर्णो महातेजा पी
2 तस्रग्दामभूषितं बलिपुष्पं च हं चैव धूपो
घं प्रतिगृह्यतां उ ध्रुपस्येति मंत्रेण मंडलेत्व
समाविश आवाहयाम्यहं देवं ग्रसस्पत्र हह
स्पतिं देवतानां गुरुं हितीवं सगाणां च ब्रोहितं
वाक्पतिं त्रिदशाचार्यं सर्वविद्याविशारदं अ
घेरङ्गिरसः पुत्रं गुरुमावाहयाम्यहं पीतव

र्णोमहातेजाः पीतस्रग्दामभूषितं बलिंशुभं
चगृह्णंचैवपूजांप्रतिगृह्णतां बृहस्पतेतिमंत्रे
णमंडलेत्वंसमाविश। आवाहयाम्यहंदेवं।
भार्गवंदैत्यपूजितं असुराणांगुरुंचैवग्रहा।
णामधिपूजितं ग्रहाणांचक्रषीणांचदीप्तिवं
तंवज्रस्तुतं करविजंदानवेंद्राणांशुक्रमावाह
याम्यहं शुक्लवर्णोमहातेजाः शुक्लस्रग्दाम
भूषितं बलिं० अन्नात्पीतिमंत्रेणमंडलेत्वं
समाविश आवाहयाम्यहंदेवंसूर्यपुत्रंशने

हो ३

3

श्वेतं सीतप्रतिवर्णाभं भूतसंहारकारकं छा।
यागर्भसंभूतं सूर्यपुत्रं महाबलं क्रूरं चक्र
रकर्माणं शनिमावाहयाम्यहं कृष्णवर्णं महा
तेजाः कृष्णस्वरूपामभूषितं बलिं शनेर्दे
वीति मंत्रेण मंडले तं समाविश आवाहयाम्य
हं देवं सैंहिकेयं महाबलं सर्वाङ्गं तारिवा
स्युभूतसंहारकारकं पर्वकाले तु संप्राप्ते ह
ष्यतेति मले वरे गस्तारं सोमसूर्ययो राहुमा
वाहयाम्यहं हरितवर्णं महातेजाः हरितस्वरू

मभ्यर्चितं बलिं॰ कोशल्कोऽतिमेत्रेणमंडले
त्वंसमाविश आवाहयाम्यहं देवं केतुं सर्वग्रहां
तकं नीलजीमूतसंकाशं मत्तबलपराक्रमं
शिरोहीनं महोग्रं चडमृत्युं चातिविक्रमं सर्वज्ञ
पूजितं हैश्वरं केतुमावाहयाम्यहं धूम्रवर्णो महा
तेजाः धूम्रस्त्र्यग्दाममभ्यर्चितं बलिं॰ केतुक॥
ण्वतिमेत्रेणमंडलेत्वंसमाविश आवाहयाम्य॥
हं देवं भगवान्तं महाबलं ऋषीणां प्रवरं श्रेष्ठं
हरिकादशावासितं ग्रहचक्रस्थितं नित्यं डमर

संप्रपूजयेत शुक्लवर्णो महातेजा शुक्लाद्य
लो. क्षसमभूषिते वलिं गृह्ण: आवाहयाम्यहं दे
४ वंमगस्त्यं देवसंवितं रुद्ररूपं परं नित्यं उग्र
रूपं तथैव च दक्षिणां चजमानेन जलधिर्वि
डतां हृतं विध्यद्रितोधिकं देवयत्न कुंभ
समुद्भवं पीतवर्णो महातेजा: पीतस्त्रगक्ष
मभूषितं वलिं: अगस्त्यायनमनेतिमं
डलेत्र समाविश आवाहयाम्यहं देवेशं
त्रैलोक्यनायकं पीताम्बरसहस्त्राक्षमदि

तिकरुणात्मकं ॐ ह्रीं मेरावतारूढं ध्वजहस्तंम
हाबलं देवानामधिराजानमिंद्रमावाहयाम्य
हं त्रातारमिन्द्रेति चैवेमं मंडलेतत्समाविशन्ना
वाहयाम्यहं देवमग्निं प्रांडिल्यनेदने छागारू
ढं शक्तिहस्तं ममनुजिह्वं महाबलं रक्तवर्ण
मत्वं देवं स्वाहापति हुताशनं अग्निर्मूर्द्धेति
मंत्रेण मंडलेतं समाविश आवाहयाम्यहं दे
वयमं देवमनुवतं विभुं महिषाधिरूढं वरदं दं
डपाणिं भयंकरं दक्षिणादिशामाश्रित्य चैलो
कग्राणहारकं यमेनदत्तमिति च मंडलेतं

होः
५
5

समाविश आवाहयाम्यहं देवं नैर्ऋतिं खड्गहस्त
के धूम्रवर्णं महावेगं रक्षोबलप्रवर्तितं श्रेष्ठं अत्र
त्वं त्वमेवेन मंडले त्वं समाविश आवाहयाम्य
हं देवं वरुणं यादसांपतिं पाशहस्तं महातेजो
महाकच्छपवाहनं सर्वतीर्थैश्च सहितं सर्वर
त्नैः समन्वितं वरुणस्त्वं भगवन्नस्मिन्मंडले त्वं
समाविश आवाहयाम्यहं देवं वायुं भूतबहि
स्थितं सर्वभूतशरीरस्थं सर्वमाशुगतिष्ठा।
तिं प्राणं नमस्यामि हुं ध्वजहस्तं महाबलं
वातोवायुर्मनोवेति मंडले त्वं समाविश आ

वाहयाम्यहं देवं कुवेरं तिपिनायकं गदाहस्तं
धिहं शंभोः सर्वयज्ञाधिपे विभं अभिरूपमिति
मंत्रेण मंडले त्वं समाविश आवाहयाम्यहं देवं
ईशानं पार्वतीपतिं ललाटं धारितो येन चंद्रः सू
उदयः सदा नमः शंभवायेति मंत्रेण मंडले त्वं
समाविश लक्ष्मीः श्रीश्च धृतिः मेधा प्रज्ञा स्वा
हा सरस्वती सर्वशुभकार्येषु समेताहृता।
मातरः गौरी पद्मा शची मेधा सावित्री विज
या जया देवसेना स्वधा स्वाहा मातरो लोकमा
तरः धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया स

हो॰ ६

6

ह गणेशेनाधिकार्यंताज्ञेयाःषोडशमातरः

इत्यावाहनानि ॥ अथाग्निस्थापनं ॐडेस्थंड

लेवा तत्रमहीप्रार्थना समुद्दरणाशांतयेत्रा

गच्छसर्वकल्याणिवसुधेलोकधारिणीपृथि

वीब्रह्मदत्तासिकश्यपेनाभिमंत्रिता उद्धृतासि

वराहेणकृष्णेनशतबाहुना दंष्ट्राग्रेःलीला

यादेवीपद्मार्थंप्रणमाम्यहं ॐमहीद्यौःपृथि

वीचनइमंयज्ञंमिमिक्षतां पिपृतान्नोभरीमभिः

वडिस्थापवेतानां छिद्रे विर्भक्षणपृष्ठसर्वेषुस्मि

प्रवर्तते ब्रह्माजिनोसिमहिलीज्वालामंडल

मया

म

माकाशमक्षमालकमंडलुं त्रिनेत्रंपंचवक्त्रंच।
होमकालेविचिंतयेत् इतिमंत्रेणभूमिंगंधा।
दिभिःसंपूज्य ततोहस्तमात्रंभूमिंचतुरस्रांविधा
योःपरिसमूह्यतान्नेशांस्याति: दिव्यगोमयोदका
केनोपलिप्यस्रुवमूलेनप्रागग्रप्रादेशमितम्
ततोरक्रमेणत्रिरुल्लिख्यउल्लेखनक्रमेणाना
मिकांगुष्ठाभ्यांपांशूनुद्धृत्यउदकेनरेखामभ्युक्ष
तत्रकांस्यपात्रेणअग्निंतलींप्रत्यङ्मुखमुपसं
धायतद्रक्षार्थंतत्रकिंचिद्विनिधुज्य ततोग्निस।
मीपेउपविश्यब्राह्मणंवरणंकुर्यात् ॐअद्या

हो: ८

स्मिन्कर्त्तव्यशांतिकर्मणि कृताकृतवेक्षणरूपा
ब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्माणं ब्राह्म
णमेभिर्गन्धपुष्पचंदनैस्तांबूलवासोभिरभ्यर्च्य ब्रह्म
त्वेनत्वामहं वृणे ॐ वृतोस्मीति प्रतिवचनं त
तोग्निर्दक्षिणतः शुद्धमासनं दत्वा प्रदक्षिणा
क्रमेणानीय अद्यत्वमेव ब्रह्मा भवेत्यभिधाय आ
सने उपवेशयेत् यथा चतुर्मुखो ब्रह्मा सर्वलो
कपितामह तथा त्वं ममयज्ञेस्मिन्ब्रह्मा भव द्वि
जोत्तम ततः आचार्यपूजनं ॐ अद्यास्मिन्कर्त्त
व्यशांतिकर्मणि हवनादिकरणार्थं अमुक।

गोत्रममुकशर्माणं चतुर्वेदस्मृतिनं ब्राह्मणैरे-
भिः श्रद्धया चंदनतांबूलवासोभिरभ्यर्च्य आचा-
र्यत्वेन त्वामहं वृणे वृतोस्मीति प्रतिवचनं आ-
चार्यस्त्वं यथा स्वर्गौपाकादीनां बृहस्पतिः तथा
त्वमपि यज्ञेस्मिन्भवाचार्यो द्विजोत्तम यथाश-
क्त्या भवामीति प्रतिवचनं ततो ब्राह्मणप्रार्थनं
अस्य यज्ञस्य सिद्ध्यर्थं भवंतोभ्यर्थितो मया सु-
प्रसादं च कर्तव्यं शांतिकं विधिपूर्वकं अथ कु-
ण्डिकाक्रमः ततः प्रणीतापात्रं पुरतः कृत्वा वा-
रिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमव

वलोकाग्रेरुत्तरतः कुशोपरि निदध्यात् ततः
परिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेया
दीशानांतं ब्रह्मणो अग्निपर्यंतं नैर्ऋत्याद्वाय
व्यांतं अग्नितः प्रणीतापर्यंतं ततोग्रेरुत्तरतः
पश्चिमदिशि पवित्रछेदनार्थं कुशात्रयं प
वित्रकरणार्थं साग्रमनंतर्गर्भितं कुशापत्र
द्वयं प्रोक्षणीपात्रं आज्यस्थालीं स्रुवसंमा
र्जनार्थं कुशात्रयं उपयमनार्थं वेणीरूपं कु
शात्रयं समित्पत्तिस्रः स्रुवः आज्यषट्पंचा
शाउत्तरयजमानमुष्टिशतद्वयवछिन्नंतं

ऊ
लक्षणीपात्रंपवित्रच्छेदनकुशानांपर्वद्वयेति
तिक्रमेणासादनीयंततःपवित्रच्छेदनकुशैः
प्रादेशमितिपवित्रकरणं ततःसपवित्रकरेण
प्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधायअनामि
काङ्गुष्ठाभ्यांहस्ताभ्यामुत्तराग्रेपवित्रेगृहीत्वात्रि
रुत्प्लवनं तत्रमन्त्रः पवित्रेस्थोवैष्णव्योसवि
ऊँ तुर्वःप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्य वसोः
रश्मिभिः ततःप्रोक्षणीपात्रस्यसव्यहस्तकरणं
अनामिकाङ्गुष्ठाभ्यांपवित्रेगृहीत्वा त्रिरुत्पवनं
ततःप्रणीतोदकेनप्रोक्षणीप्रोक्षणांसवित्राणि

हो॰ ८८ दा

श्विनो

सवित्रस्यदेवस्यत्वासवितुःप्रसवे[...]र्बाहुभ्यांपू
ष्णोहस्ताभ्यांइतिमंत्रेप्रोक्षणीप्रोक्षणं ततः मं
प्रोक्षणीजलेनसादितवस्तुसेचनं अग्निप्र
णीतयोर्मध्येप्रोक्षणीपात्रंनिधाय ततश्चाज्य
स्थाल्यामाज्यनिर्वापः चरुस्थाल्यांस्रुवेणातं
डुलप्रक्षेपणं एकःपयोसितस्यतेहीयमान
स्यनिर्वपामितिमंत्रेण ततः पिधानं त
तोज्वलत्तृणादिनाहविर्वेष्टयित्वाप्रदक्षि
णाक्रमेणपर्यग्निकरणं ततः स्रुक्स्रुवः प्रता
पनं संमार्जनं उपयमनानामग्रे रतरतोमलेर्वायः

स्रुवसंमार्जनंप्रणीतोदकेनाभ्युक्ष्यपुनःप्रा
ताप्यस्रुवंदक्षिणतोनिदध्यात् ततःआज्य।
स्याग्नेरवतार्य्यआज्येप्रोक्षणीवदुत्पवनं अवे
क्षणमपद्रव्येसतिनिरसनंपुनःप्रोक्षणीवदु।
त्पवनं ततःउपयमनकुशान्वामहस्तेनादा
यत्रिःप्रजापतिंमनसाध्यात्वाघृताक्तास्ति
स्रःपलाशसमिधास्तूष्णीमग्नौक्षिपेत् उपवि
श्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणप
र्युक्षणंकृत्वा प्रणीतापात्रेपवित्रेनिधायपाति
तदक्षिणजानुक्रमेणब्रह्मणान्वारब्धःयज

होः ११

10

मानःसमिद्धतमेवाग्नौस्रुवेणाज्याहुतिर्जुहो
तितत्रचाघारादारभ्यहोदशाहुतिश्रुतस्तदाहुत्य
नंतरस्रुवावस्थितहुतशेषस्यहुतस्यप्रोक्षा
णीपात्रेप्रक्षेपः ॐप्रजापतयेस्वाहा इदंप्रजा
पतयेस्वाहा इतिमानसा ॐइन्द्रायस्वाहा इ
दमिन्द्राय इत्याघारौ ॐअग्नयेस्वाहा इदमग्न
ये ॐसोमायस्वाहा इदंसोमाय इत्याज्यभा
गौ ॐभूःस्वाहा इदंभूः ॐभुवःस्वाहा इदं
भुवः ॐस्वःस्वाहा इदंस्वः ॐमहःस्वाहा
इदंमहः ॐजनःस्वाहा इदंजनः ॐतपः

स्वाहा इदं तपः ॐ सत्यं स्वाहा इदं सत्यं एतान्म
हाव्याहृतयः ॐ आकृष्णेति सूर्यमंत्रस्य हिर
ण्यस्तूप ऋषिः अंगिरस ऋषिः आदित्यो देव
तात्रिष्टुप्छंदः सूर्यप्रीतये अर्कसमिद्धोमा
विनियोगः ॐ आकृष्णेन रजसा वर्तमानो निवे
शयन्नमृतं मर्त्यं हिरण्ययेन सविता रथेन दे
वो याति भुवनानि पश्यन् स्वाहा इदं सूर्याय आ
दित्याय सहस्रकिरणः श्रीमान्सप्ताश्वो लोक
बांधवः भक्तानां वरदो भानुः प्रीतो भवति भा
स्करः आप्यायस्वेति चंद्रमंत्रस्य प्रजापतिऋ

षिः सोमो देवता गायत्री छंदः सोमप्रीतये पला
शसमिद्धोमे विनियोगः ॐ आप्यायस्व समेतु
ते विश्वतः सोम वृष्ण्यं भवा वाजस्य संगथे स्वाहा
इदं वह्नणाय चंद्रमसे द्विजियस्य सितेपद्मेसहा
णामस्तेत्रयः संपूर्णमंडलो बालास भौमः
प्रीयतानव ॐ अग्निमूर्धेति भौममंत्रस्य विरू
पाक्षांगिरसऋषिः अंगारको देवता गायत्री छं
दः भौमप्रीतये खदिरसमिद्धोमे विनियोगः
ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं ३
अपांरेतांसि जिन्वति स्वाहा इदं कुमा

रभौमायभूमिपुत्रोमहातेजावक्रिरूपीमहा
बलः ग्रहाणामधिपः श्रेष्ठः सभौमःप्रीय
तांमम ॐउद्बुध्यस्वेतित्रुपमंत्रस्यबुधऋषिः
बुधोदेवतात्रिष्टुप्छंदःबुधप्रीतयेअपामा
र्गसमिद्धोमेविनियोगः ॐउद्बुध्यस्वाग्नेप्रति
जागृहित्वमिष्टापूर्तेसंसृजेथामयंचअस्मि
न्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसी
सीदतस्वाहा ॐइदंविस्नवेबुधाय सिंहासनस्थो
वरदःकर्णिकारसमद्युतिःखड्गचर्मधरःपाणिः
सबुधोवरदोस्तुनः ॐबृहस्पतेतिमंत्रस्यगृ

हो॰ १२ 12

त्समदऋषिः बृहस्पतिर्देवता त्रिष्टुप्छंदः बृ
हस्पतिप्रीतये अश्वत्थसमिद्धोमे विनियोगः
ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क पर
तुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात
तदस्मासु द्रविणं धेहि चित्रं स्वाहा ३ इदमि
न्द्राय बृहस्पतये इदं डाक्षसूत्रधारी च कमंडलु
धरः सदा पीतवर्णाश्च तेर्वाङ्कु पातु नो वाकाति
भूषणं ॐ अग्न्यात्यारि शुक्रति शुक्र मंत्रस्य भ
रद्वाज ऋषिः शुक्रो देवता अतिजगती छंदः
शुक्रप्रीतये ॐ वरसमिद्धोमे विनियोगः

ॐ

ॐ अन्नात्परिस्रुतो रसो ब्रह्मणा व्यपिबत्क्षत्रं प
यः सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपा
नं शुक्रमन्धसः इन्द्रस्येन्द्रियमिदं पयोमृतं स्वा
हा इदं सोमाय स्वस्त्यै शुक्राय श्वेतवर्णाय त्रिनेत्राय रुद्रः
मालाक्षसूत्रकमण्डलुः सर्वस्वात्मापरं धामसूक्ष्म
मेखलावरप्रदः ॐ शन्नो देवीरिति मन्त्रस्य सिंधु शांति
द्वीपऋषिः शनैश्चरो देवता गायत्री छंदः शनै
श्चरप्रीतये शमीसमिद्धोमे विनियोगः ॐ श
न्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोर
भिस्रवन्तु नः स्वाहा इदं यमाय शनैश्चराय

भिन्ननीलांजनः प्रख्योवरदो गृध्रवाहनः पंगुः
हो॰ स्थूलपरेभीमः सदाशत्रुविमर्दनः सनंदादिः ऋ
१३ षिभिः साध्यैर्देवैश्च वनमस्कृतः पातुनोकेसुतः
13 श्रीमान् ग्रहैः सर्वैः सुपूजितः ॐकांऊंत्कांऊं
ति राहुमंत्रस्य प्रजापतिऋषिः राहुर्देवतानु
नुष्टुप्छंदः राहुप्रीतये हवी समिद्धोमविनि
योगः ॐकांऊंत्कांऊंत्यरोहेतिष्ठहषः बृह
स्पतिः पवान्नहर्वंस्प्रतन्नः सहस्रेणयूतिन
चस्वाहा ३ इदंगणपतयेराहवे चंद्रार्कौग्रस
तेयश्च भीमः पर्वणिपर्वणि राहुर्नवग्रहः

म्रेहः स्वाङ्गः प्रीयतांमम ॐ केतुंकृण्वन्निति
केतुमंत्रस्य मधुच्छंदः ऋषिः केतुर्देवता गाय
त्रीछंदः केतुप्रीतये जपहोमसमिद्धोमे विनियो
गः ॐ केतुंकृण्वन्नकेतवे पेशो मर्या अपेश
से समुषद्भिरजायथाः स्वाहा इदं इंद्राय केतवे
पीडिते पीडयायस्य देवगंधर्वकिंनराः स केतु
धूम्रवर्णाभः प्रीतो भवतु मे सदा ॐ त्रातारमिं
द्रमवितारमिंद्र ५४ शूरमिंद्रमाहुयामि स्वस्ति
नो मघवा धात्विंद्रः स्वाहा इदमिंद्राय अग्निर्हि
तंपुरोदधेहव्यवाहनमुपब्रुवे देवांआसादयादिह

हो॰ २४ 14

स्वाहा इदमग्नये ॐ यमेनदत्तं त्रित एनमायुना
गेंद्रेणं प्रथमो अध्यतिष्ठन्। गंधर्वोस्य रसनामि
स्मातिदिशा स्वाहा इदं यमाय ॐ अस्विन्नस्यया
जमानमिहं स्लेन्यमस्य हितस्करस्य श्यानमो
देविनिर्ऋतये तुभ्यमस्तु स्वाहा इदं निर्ऋता
ये ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कंभ सर्ज
नीस्थो वरुणस्य ऋतसदनमसि वरुणस्य
ऋतसदनमसि वरुणस्य ऋतसदनमा
सीद स्वाहा इदं वरुणाय ॐ वातो वा मनो
वा गंधर्वाः सप्तविंशतितेनास्मिन्। अयमेदया

नेट

स्वाहा इदं वायवे ॐ अभि त्वं देवं सवितार
मोण्यं कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिं कविं
ऊर्ध्वं यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपा
णिरमिमीत सुक्रतुः कृपा स्वः प्रजाभि
स्त्वानुप्राणाय ऐहि स्वाहा इदं कुबेराय ॐ तमी
शानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हू
महे वयं पूषा णो वेदसा यथासमसद्वृधे पहि पा
देवां स्वस्तये स्वाहा इदमीशानाय अनेना
ज्यादि होमेन इन्द्राग्नियमनिर्ऋतिवरुणवायु
कुबेरेशानाः प्रीयन्तां प्रीताः सन्तु श्रेयः कुर्वन्तु
नित्यशः यथा वा गोति द्यौः शान्तिरित्यादि प
रिति तापायुरस्य स्वस्तये

कवि
न॰

ठेत्. ॐ यमदग्नेआयुषंपठेत्. इतिनवग्रह
संक्षेपहोमविधिःसमाप्तः अथाग्निवाहनं
होः १५ आवाहयिष्येवरदं देवदेवं हुताशनं आया
15 हि शांडिल्यपुत्रं देवश्रेष्ठमहामुने हिरण्यरे
ताआयाहिदीप्तिमावाहिपावकः ॐ अग्नये
स्वाहा सहिताय पाद्यं नमः स्नानं नमः गं
धः पुष्पधूपदीपनैवेद्यं नमः इतिॐ वि
ल्वंत्वं हृद्गृहे पासि महामायामय प्रभो कौवेर
द्वारमाश्रित्य रक्ष्य यज्ञान्तिकेतनं त्वयासर्वा
णि रक्षांसि डाकिनि वनस्पते रक्षणीयानि

मतंतंसमाहितोवसर्वदा इतिगंधादिभिसंपूजयेत् यज्ञमालायैनमः ॐततोयज्ञमालापूजनं यज्ञमालेनमस्तुभ्यंयज्ञरक्षाकृतस्मेदेत्यानांदेहनाशाययज्ञसंरक्षणाय च धारितासिजगद्धात्रीसर्वसिद्धिप्रदायिनी शत्रुसंहारिणीदेवीमित्राणांहर्षवर्द्धिनी संकटेविकटेहर्षेविघ्नेदेवकटकः यज्ञहाचतथाःलंभःदाहेयज्ञविनाशकः तेसर्वेनिष्फलायांतियज्ञभंगंतदेवता इतिपठित्वागंधादिभिःपूजयेत् ॥